श्री एकाक्षर गणपति कवचं

एकाक्षर गणपति कवचं

नमस्तस्मै गणेशाय सर्वविघ्नविनाशिने |
कार्यारंभेषु सर्वेषु पूजितो यः सुरैरपि ||1||

पार्वत्युवाच |
भगवन् देवदेवेश लोकानुग्रहकारकः |
इदानीं श्रोतृमिच्छामि कवचं यत्प्रकाशितं ||2||

एकाक्षरस्य मंत्रस्य त्वया प्रीतेन चेतसा |
वदैतद्विधिवद्देव यदि ते वल्लभास्म्यहं ||3||

ईश्वर उवाच |
शृणु देवि प्रवक्ष्यामि नाख्येयमपि ते ध्रुवं |
एकाक्षरस्य मंत्रस्य कवचं सर्वकामदं ||4||

यस्य स्मरणमात्रेण न विघ्नाः प्रभवंति हि |
त्रिकालमेककालं वा ये पठंति सदा नराः ||5||

तेषां क्वापि भयं नास्ति संग्रामे संकटे गिरौ |
भूतवेतालरक्षोभिर्ग्रहैश्चापि न बाध्यते ||6||

इदं कवचमज्ञात्वा यो जपेद्गणनायकं |
न च सिद्धिमाप्नोति मूढो वर्षशतैरपि ||7||

अघोरो मे यथा मंत्रो मंत्राणामुत्तमोत्तमः |
तथेदं कवचं देवि दुर्लभं भुवि मानवैः ||8||

गोपनीयं प्रयत्नेन नाज्येयं यस्य कस्यचित् |
तव प्रीत्या महेशानि कवचं कथ्यतेऽद्भुतं ||9||

एकाक्षरस्य मंत्रस्य गणकश्चर्षिरीरितः |
त्रिष्टुप् छंदस्तु विघ्नेशो देवता परिकीर्तिता ||10||

गं बीजं शक्तिरोंकारः सर्वकामार्थसिद्धये |
सर्वविघ्नविनाशाय विनियोगस्तु कीर्तितः ||11||

ध्यानं |
रक्तांभोजस्वरूपं लसदरुणसरोजाधिरूढं त्रिनेत्रं
पाशं चैवांकुशं वा वरदमभयदं बाहुभिर्धारयंतं |
शक्त्या युक्तं गजास्यं पृथुतरजठरं नागयज्ञोपवीतं
देवं चंद्रार्धचूडं सकलभयहरं विघ्नराजं नमामि ||12||

कवचं |
गणेशो मे शिरः पातु फालं पातु गजाननः |
नेत्रे गणपतिः पातु गजकर्णः श्रुती मम ||13||

कपोलौ गणनाथस्तु घ्राणं गंधर्वपूजितः |
मुखं मे सुमुखः पातु चिबुकं गिरिजासुतः ||14||

जिह्वां पातु गणक्रीडो दंतान् रक्षतु दुर्मुखः |
वाचं विनायकः पातु कंठं पातु मदोत्कटः ||15||

स्कंधौ पातु गजस्कंधो बाहू मे विघ्ननाशनः |
हस्तौ रक्षतु हेरंबो वक्षः पातु महाबलः ||16||

हृदयं मे गणपतिरुदरं मे महोदरः |
नाभिं गंभीरहृदयो पृष्ठं पातु सुरप्रियः ||17||

कटिं मे विकटः पातु गुह्यं मे गुहपूजितः |
ऊरु मे पातु कौमारं जानुनी च गणाधिपः ||18||

जंघे जयप्रदः पातु गुल्फौ मे धूर्जटिप्रियः |
चरणौ दुर्जयः पातुसर्ांगं गणनायकः ||19||

आमोदो मेऽग्रतः पातु प्रमोदः पातु पृष्ठतः |
दक्षिणे पातु सिद्धीशो वामे विद्याधरार्चितः ||20||

प्राच्यां रक्षतु मां नित्यं चिंतामणिविनायकः |
आग्नेय्यां वक्रतुंडो मे दक्षिणस्यामुमासुतः ||21||

नैर्ऋत्यां सर्वविघ्नेशो पातु नित्यं गणेश्वरः |
प्रतीच्यां सिद्धिदः पातु वायव्यां गजकर्णकः ||22||

कौबेर्यां सर्वसिद्धीशो ईशान्यामीशनंदनः |
ऊर्ध्वं विनायकः पातु अधो मूषकवाहनः ||23||

दिवा गोक्षीरधवळः पातु नित्यं गजाननः |
रात्रौ पातु गणक्रीडो संध्ययो सुरवंदितः ||24||

पाशांकुशाभयकरः सर्वतः पातु मां सदा |
ग्रहभूतपिशाचेभ्यो पातु नित्यं गणेश्वरः ||25||

सत्त्वं रजस्तमो वाचं बुद्धिं ज्ञानं स्मृतिं दयां |
धर्मं चतुर्विधं लक्ष्मीं लज्जां कीर्तिं कुलं वपुः ||26||

धनधान्यगृहांदारान् पुत्रान्पौत्रान् सखींस्तथा |
एकदंतोऽवतु श्रीमान् सर्वतः शंकरात्मजः ||27||

सिद्धिदं कीर्तिदं देवि प्रपठेन्नियतः शुचिः |
एककालं द्विकालं वा त्रिकालं वापि भक्तितः ||28||

न तस्य दुर्लभं किंचित् त्रिषु लोकेषु विद्यते |
सर्वपापविनिर्मुक्तो जायते भुवि मानवः ||29||

यं यं कामयते मर्त्यः सुदुर्लभमनोरथं |
तं तं प्राप्नोति सकलं षण्मासान्नात्र संशयः ||30||

मोहनस्तंभनाकर्षमारणोच्चाटनं वशं |
स्मरणादेव जायंते नात्र कार्या विचारणा ||31||

सर्वविघ्नहरेद्देवीं ग्रहपीडानिवारणं |
सर्वशत्रुक्षयकरं सर्वापत्तिनिवारणं ||32||

धृत्वेदं कवचं देवि यो जपेन्मंत्रमुत्तमं |
न वाच्यते स विघ्नौघैः कदाचिदपि कुत्रचित् ||33||

भूर्जे लिखित्वा विधिवद्धारयेद्यो नरः शुचिः |
एकबाहो शिरः कंठे पूजयित्वा गणाधिपं ||34||

एकाक्षरस्य मंत्रस्य कवचं देवि दुर्लभं |
यो धारयेन्महेशानि न विघ्नैरभिभूयते ||35||

गणेशहृदयं नाम कवचं सर्वसिद्धिदं |
पठेद्वा पाठयेद्वापि तस्य सिद्धिः करे स्थिता ||36||

न प्रकाश्यं महेशानि कवचं यत्र कुत्रचित् |
दातव्यं भक्तियुक्ताय गुरुदेवपराय च ||37||

इति श्रीरुद्रयामले पार्वतीपरमेश्वर संवादे एकाक्षरगणपतिकवचं संपूर्णं |